मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात्। [१]तदित्थम्—अ इ उ ऋ एषां वर्णानां प्रत्येकमष्टादश भेदाः। लृवर्णस्य द्वादश तस्य दीर्घाभावात्। एचामपि द्वादश तेषां ह्रस्वाभावात्*॥

[२]**तुल्यास्यप्रयत्नं सवर्णम् १। १। ९॥**

ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात् (ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्)। अकुहविसर्जनीयानां कण्ठः। इचुयशानां तालु। ऋटुरषाणां मूर्धा। लृतुलसानां दन्ताः। उपूपध्मानीयानामोष्ठौ। ञमङणनानां नासिका च[३]। एदैतोः कण्ठतालु। ओदौतोः कण्ठोष्ठम्। वकारस्य दन्तोष्ठम्।

---

१-पूर्वोक्तैः 'ऊकालोऽच्-' इत्यादिभिः पञ्चभिः सूत्रैर्यत्कार्यमुक्तं तदित्थमनेन प्रकारेण ज्ञेयमित्यर्थः॥

* अचामष्टादशभेदविवरणम्—

| अ इ उ ऋ लृ | अ इ उ ऋ ए ओ ऐ औ | अ इ उ ऋ लृ ए ओ ऐ औ |
|---|---|---|
| ह्रस्वभेदाः। | दीर्घभेदाः। | प्लुतभेदाः। |
| १ उदात्तानुनासिकः | ७ उदात्तानुनासिकः | १३ उदात्तानुनासिकः |
| २ उदात्ताननुनासिकः | ८ उदात्ताननुनासिकः | १४ उदात्ताननुनासिकः |
| ३ अनुदात्तानुनासिकः | ९ अनुदात्तानुनासिकः | १५ अनुदात्तानुनासिकः |
| ४ अनुदात्ताननुनासिकः | १० अनुदात्ताननुनासिकः | १६ अनुदात्ताननुनासिकः |
| ५ स्वरितानुनासिकः | ११ स्वरितानुनासिकः | १७ स्वरितानुनासिकः |
| ६ स्वरिताननुनासिकः | १२ स्वरिताननुनासिकः | १८ स्वरिताननुनासिकः |

२-अस्यन्ति उच्चारयन्ति वर्णान् अनेनेति आस्यम्, आस्ये भवमास्यं प्रकृष्टो यत्नः प्रयत्नः आस्यं च प्रयत्नश्च आस्यप्रयत्नौ तुल्यावास्यप्रयत्नौ यस्य तत्तुल्यास्यप्रयत्नम्॥

३-चकारेण स्वस्ववर्गानुकूलं ताल्वादि समुच्चीयते॥

Rarest Archiver

जिह्वामूलीयस्य जिह्वामूलम्। नासिकाऽनुस्वारस्य*। यत्नो द्विधा—आभ्यन्तरो बाह्यश्च। आद्यः पञ्चधा—स्पृष्टेषत्स्पृष्टेषद्विवृतविवृतसंवृतभेदात्। तत्र स्पृष्टं प्रयत्नं स्पर्शानाम्। ईषत्स्पृष्टमन्तःस्थानाम्। ईषद्विवृतमूष्मणाम्। विवृतं स्वराणाम्। ह्रस्वस्यावर्णस्य प्रयोगे संवृतम्। प्रक्रियादशायां तु विवृतमेव। बाह्यप्रयत्नस्त्वेकादशधा[१]—विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति। खरो विवाराः श्वासा अघोषाश्च। हशः संवारा नादा घोषाश्च। वर्गाणां प्रथमतृतीयपञ्चमा यणश्चाल्पप्राणाः। वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः। कादयो मावसानाः स्पर्शाः। यणोऽन्तःस्थाः। शल ऊष्माणः। अचः स्वराः।† ᳲक ᳲख

* वर्णोद्भवस्थानकोष्ठकम्—

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| अ | इ | ऋ | लृ | उ | ञ | ए | ओ | | ᳲक | |
| क | च | ट | त | प | म | ऐ | औ | व | ᳲख | |
| ख | छ | ठ | थ | फ | ङ | | | | | |
| ग | ज | ड | द | ब | ण | | | | | |
| घ | झ | ढ | ध | भ | न | | | | | वर्णाः |
| ङ | ञ | ण | न | म | ं | | | | | |
| ह | य | र | ल | ᳲप | | | | | | |
| ः | श | ष | स | ᳲफ | | | | | | |
| कण्ठः | तालु | मूर्धा | दन्ताः | ओष्ठौ | नासिका | कं.ता. | कं.ओ. | दं.ओ. | जि.मू. | स्थानानि |

१-बाह्यप्रयत्ना यद्यपि सवर्णसंज्ञायामनुपयुक्तास्तथापि वर्णानामान्तरतम्य परीक्षायामेषामुपयोगो बोध्यः॥

†आभ्यन्तरबाह्यप्रयत्नज्ञानार्थकं कोष्ठकम्—

| आभ्यन्तर-प्रयत्नाः | स्पृष्टाः | | | ईषत्स्पृष्टाः | ईषद्विवृताः | | विवृताः | संवृताः |
|---|---|---|---|---|---|---|---|---|
| संज्ञाः | स्पर्शाः | | | अन्तःस्थाः | ऊष्माणः | | स्वराः | |
| वर्णाः | क ख<br>च छ<br>ट ठ<br>त थ<br>प फ | ग ङ<br>ज ञ<br>ड ण<br>द न<br>ब म | घ<br>झ<br>ढ<br>ध<br>भ | य<br>व<br>र<br>ल | श<br>ष<br>स | ह | अ इ उ<br>ऋ लृ ए<br>ओ ऐ औ | ह्रस्वोऽकारः प्रयोगे |
| बाह्यप्रयत्नाः | अ.प्रा.म.प्रा.<br>विवाराः<br>श्वासाः<br>अघोषाः | अल्पप्राणाः<br>संवाराः<br>नादाः<br>घोषाः | म.प्रा.<br>संवाराः<br>नादाः<br>घोषाः | अ.प्रा.<br>संवाराः<br>नादाः<br>घोषाः | म.प्रा.<br>विवाराः<br>श्वासाः<br>अघोषाः | म.<br>सं.<br>ना.<br>घो. | उदात्तानुदात्तस्वरिताः | |

Rarest Archiver

इति कखाभ्यां प्रागर्धविसर्गसदृशो जिह्वामूलीयः। ⌅प ⌅फ इति पफाभ्यां प्रागर्धविसर्गसदृश उपध्मानीयः। अं अः इत्यचः परावनुस्वारविसर्गौ॥

**अणुदित्सवर्णस्य चाप्रत्ययः १। १। ६९॥**

प्रतीयते विधीयत इति प्रत्ययः। [1]अविधीयमानोऽणुदिच्च सवर्णस्य संज्ञा स्यात्। अत्रैवाण् [2]परेण णकारेण। कु चु टु तु पु एते उदितः। तदेवम्—अ इत्यष्टादशानां संज्ञा। तथेकारोकारौ। ऋकारस्त्रिंशतः। एवं लृकारोऽपि। एचो द्वादशानाम्। अनुनासिकाननुनासिकभेदेन यवला [3]द्विधा; तेनाननुनासिकास्ते द्वयोर्द्वयोस्संज्ञाः॥

**परः संनिकर्षः संहिता १। ४। १०९॥**

वर्णानामतिशयितः संनिधिः संहितासंज्ञः स्यात्॥

**हलोऽनन्तराः संयोगः १। १। ७॥**

अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः॥

**सुप्तिङन्तं पदम् १। ४। १४॥**

सुबन्तं तिङन्तं च पदसंज्ञं स्यात्॥

इति संज्ञाप्रकरणम्।

१-विधीयमानोऽण् आदेशप्रत्ययागमरूपस्तद्भिन्नोऽण् उद्देश्यभूतः स स्वसवर्णस्य संज्ञा इत्यर्थः॥

२-अत्रेदं प्रमाणम्—

परेणैवेण्ग्रहाः सर्वे पूर्वेणैवाण्ग्रहा मताः।
ऋतेऽणुदित्सवर्णस्येत्येदेकं परेण तु॥ इति॥

३ -यँ य् वँ व् लँ ल् इत्येवंरूपेणेति बोध्यम्; तेन हेतुना निरनुनासिका यरादिषु पठितास्ते यवला द्वयोर्द्वयोर्ग्राहका भवन्तीत्यर्थः।

Rarest Archiver